✧˳┈°*❋ ❋*°┈˳✧

# संकटनाशन गणेश स्तोत्र – प्रणम्य शिरसा देव गौरीपुत्रं (Shri Sankat Nashan Ganesh Stotra)

**in Gujarati**

## સંકટ નાશન ગણેશ સ્તોત્રમ્

✧˳┈°*❋ ❋*°┈˳✧

# સંકટ નાશન ગણેશ સ્તોત્રમ્

**નારદ ઉવાચ ।**

પ્રણમ્ય શિરસા દેવં ગૌરીપુત્રં વિનાયકમ્ ।
ભક્તાવાસં સ્મરેન્નિત્યમાયુષ્કામાર્થસિદ્ધયે ॥ 1 ॥

પ્રથમં વક્રતુંડં ચ એકદંતં દ્વિતીયકમ્ ।
તૃતીયં કૃષ્ણપિંગાક્ષં ગજવક્ત્રં ચતુર્થકમ્ ॥ 2 ॥

લંબોદરં પંચમં ચ ષષ્ઠં વિકટમેવ ચ ।
સપ્તમં વિઘ્નરાજં ચ ધૂમ્રવર્ણં તથાષ્ટમમ્ ॥ 3 ॥

નવમં ભાલચંદ્રં ચ દશમં તુ વિનાયકમ્ ।
એકાદશં ગણપતિં દ્વાદશં તુ ગજાનનમ્ ॥ 4 ॥

દ્વાદશૈતાનિ નામાનિ ત્રિસંધ્યં યઃ પઠેન્નરઃ ।
ન ચ વિઘ્નભયં તસ્ય સર્વસિદ્ધિકરં પરમ્ ॥ 5 ॥

વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ્ ।
પુત્રાર્થી લભતે પુત્રાન્મોક્ષાર્થી લભતે ગતિમ્ ॥ 6 ॥

જપેદ્ગણપતિસ્તોત્રં ષડ્ભિર્માસૈઃ ફલં લભેત્ ।
સંવત્સરેણ સિદ્ધિં ચ લભતે નાત્ર સંશયઃ ॥ 7 ॥

અષ્ટભ્યો બ્રાહ્મણેભ્યશ્ચ લિખિત્વા યઃ સમર્પયેત્ ।
તસ્ય વિદ્યા ભવેત્સર્વા ગણેશસ્ય પ્રસાદતઃ ॥ ૮ ॥

**ઇતિ શ્રીનારદપુરાણે સંકષ્ટનાશનં નામ ગણેશ સ્તોત્રમ્ ।**

✧˖·˚*❋ ❋*˚·˖✧